DO NOT OPEN THIS TEST BOOKLET UNTIL YOU ARE ASKED TO DO SO

**T.B.C. : 19/14/ET** **Booklet Sr. No..................................**

848

# TEST BOOKLET

# SANSKRIT

# PAPER II

Time Allowed : $1\frac{1}{4}$ Hours] [Maximum Marks : 100

*All* questions carry equal marks.

## INSTRUCTIONS

1. Write your Roll Number only in the box provided alongside. Do not write anything else on the Test Booklet.
2. This Test Booklet contains **50** items (questions). Each item comprises four responses (answers). Choose only one response for each item which you consider the best.
3. After the candidate has read each item in the Test Booklet and decided which of the given responses is correct or the best, he has to mark the circle containing the letter of the selected response by blackening it completely with Ball point pen as shown below. *H.B. Pencil should not be used* in blackening the circle to indicate responses on the answer sheet. In the following example, response "C" is so marked :

   (A) (B) ● (D)

4. Do the encoding carefully as given in the illustrations. While encoding your particulars or marking the answers on answer sheet, you should blacken the circle corresponding to the choice in full and no part of the circle should be left unfilled. You may clearly note that since the answer sheets are to be scored/evaluated on machine, any violation of the instructions may result in reduction of your marks for which you would yourself be responsible.
5. You have to mark all your responses ONLY on the ANSWER SHEET separately given. *Responses marked on the Test Booklet or in any paper other than the answer sheet shall not be examined.* Use Ball point pen for marking responses.
6. All items carry equal marks. Attempt all the fifty items.
7. Before you proceed to mark responses in the Answer Sheet fill in the particulars in the front portion of the Answer Sheet as per the instructions.
8. After you have completed the test, hand over the OMR answer sheet to the Invigilator.

DO NOT OPEN THIS TEST BOOKLET UNTIL YOU ARE ASKED TO DO SO

## प्रश्नपत्र II

समय : $1\frac{1}{4}$ घण्टे] [पूर्णाङ्काः : 100

**नोट** : इस प्रश्नपत्र में **पचास (50)** बहुविकल्पीय प्रश्न हैं । प्रत्येक प्रश्न के **दो (2)** अंक हैं । **सभी** प्रश्नों के उत्तर दीजिये ।

1. निम्नलिखितासु का देवता पृथिवीस्थानीया ?

(A) सवितृ (B) इन्द्रः

(C) अग्निः (D) विष्णुः

2. अधस्तनासु का देवता अन्तरिक्षस्थानीया ?

(A) सोमः (B) रुद्रः

(C) वरुणः (D) बृहस्पतिः

3. कस्य वेदस्य आरण्यकं न प्राप्यते ?

(A) अथर्ववेदस्य (B) सामवेदस्य

(C) यजुर्वेदस्य (D) ऋग्वेदस्य

4. कौषीतकिब्राह्मणस्य केन सह सम्बन्धोऽस्ति ?

(A) अथर्ववेदेन (B) सामवेदेन

(C) यजुर्वेदेन (D) ऋग्वेदेन

5. ईशोपनिषद् केन वेदेन सह सम्बद्धा ?

(A) अथर्ववेदेन (B) शुक्लयजुर्वेदेन

(C) कृष्णयजुर्वेदेन (D) सामवेदेन

6. ईश्वरेण सृष्ट्युत्पत्या सह ऋषीणां हृदयेषु वेदानां ज्ञानं प्रकाशितम्, इति मतमस्ति :

(A) महर्षिदयानन्दसरस्वतेः

(B) लोकमान्यबालगङ्गाधरतिलकस्य

(C) मैक्षमूलरस्य

(D) ए वेबरस्य

7. कल्पग्रन्थेषु न गण्यते :

(A) बौधायनधर्मसूत्रम् (B) कात्यायनश्रौतसूत्रम्

(C) शांखायनगृह्यसूत्रम् (D) उणादिसूत्रम्

8. पुरुरवा-उर्वशी संवादः क्व वर्तते ?

(A) कृष्णयजुर्वेदे (B) शुक्लयजुर्वेदे

(C) ऋग्वेदे (D) अथर्ववेदे

9. छन्दःशास्त्रस्यलेखकोऽस्ति :

(A) वाधूलः (B) पिङ्गलः

(C) भास्करः (D) लौगाक्षिः

10. शुक्लयजुर्वेदीय शिक्षा ग्रन्थोऽस्ति :

(A) नारदशिक्षा (B) भारद्वाजशिक्षा

(C) माण्डुकीशिक्षा (D) याज्ञवल्क्यशिक्षा

11. वेदपुरुषस्य ज्यौतिषं कतममङ्गम् ?

(A) चक्षुः (B) घ्राणम्

(C) मुखम् (D) पादम्

12. वेदस्य विकृतिपाठभेदानां समुचितः क्रमोऽस्ति :

(A) शिखा, रेखा जटा माला, घनः, रथः, दण्डः, ध्वजः।

(B) माला, शिखा, जटा रेखा, रथः, घनः, दण्डः, ध्वजः।

(C) जटा, माला, शिखा, रेखा, ध्वजः, दण्डः, रथः, घनः।

(D) जटा, माला, रेखा, शिखा, दण्डः, ध्वजः, रथः, घनः।

13. प्रकृतिविकृतयः सन्ति :

(A) नव (B) पञ्च

(C) सप्त (D) षट्

14. प्रधानस्य प्रत्यक्षं न भवति :

(A) अतिदूरात् (B) सौक्ष्म्यात्

(C) अतिसामीप्यात् (D) व्यवधानात्

15. अहंकारात् कतिविध: सर्ग: प्रवर्तते ?

(A) द्विविध: (B) त्रिविध:

(C) चतुर्विध: (D) दशविध:

16. विशुद्धं केवलं ज्ञानं कस्माद् उत्पद्यते ?

(A) दृष्टात् (B) अनुमानात्

(C) व्यक्तात् (D) तत्त्वाभ्यासात्

17. बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्य: निवर्तनम् अस्ति :

(A) शम: (B) उपरति:

(C) दम: (D) तितिक्षा

18. वेदान्तसारानुसारं अज्ञानमस्ति :

(A) सत् (B) असत्

(C) सदसत् (D) सदसद्भ्याम् अनिर्वचनीयम्

19. इयं बुद्धिर्ज्ञानेन्द्रियै: सहिता भवति :

(A) अन्नमयकोश: (B) प्राणमयकोश:

(C) विज्ञानमयकोश: (D) आनन्दमयकोश:

20. अहिंसासत्यास्तेयब्रह्मचर्या परिग्रहाः सन्ति :

(A) यमाः (B) नियमाः

(C) प्राणायामाः (D) धारणा

21. निम्नलिखितेषु पटस्य असमवायिकारणं किम् ?

(A) तन्तवः (B) तन्तुरूपम्

(C) तन्तुसंयोगः (D) पटरूपम्

22. इन्द्रियार्थसन्निकर्षः :

(A) चतुर्विधः (B) त्रिविधः

(C) पञ्चविधः (D) षड्विधः

23. अनुमानवाक्यस्य अवयवाः कति ?

(A) पञ्च (B) चत्वारः

(C) षट् (D) त्रयः

24. उपमितेः कारणम् :

(A) परार्थानुमानम् (B) स्वार्थानुमानम्

(C) शब्दप्रमाणम् (D) उपमानम्

25. 'परः सन्निकर्षः' कस्याम् परिभाषायाम् प्रयुज्यते :

(A) गुणपरिभाषा (B) संहितापरिभाषा

(C) प्रगृह्यपरिभाषा (D) नदीपरिभाषा

26. गुणसंज्ञाविधायकं सूत्रं किमस्ति ?

(A) आद्गुणः

(B) अदेङ् गुणः

(C) सार्वधातुकार्धधातुकयोः

(D) अलोऽन्त्यस्य

27. 'अन्यत्' इत्यस्मिन् पदे उपधासंज्ञकः को वर्णः ?

(A) त्

(B) य्

(C) यकारोत्तरवर्ती अकारः

(D) आदिः अकारः

28. वृद्धिसंज्ञाविधायकं किं सूत्रम् ?

(A) वृद्धिरेचि

(B) वृद्धिरादैच्

(C) इको गुणवृद्धी

(D) अलोऽन्त्यस्य

29. 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सूत्रेण किं कार्यं भवति ?

(A) सुपः संज्ञाविधानम्

(B) सुपो लुक्

(C) सुप्स्थाने आदेशः

(D) सकारागमः

30. 'तथायुक्तं चानीप्सितम्' इत्यनेन सूत्रेण का संज्ञा विधीयते ?

(A) करणसंज्ञा

(B) कर्मसंज्ञा

(C) अपादानसंज्ञा

(D) अधिकरणसंज्ञा

31. 'मासमधीते' इत्यस्मिन् प्रयोगे द्वितीया विभक्तिः केन सूत्रेण भवति ?

(A) इत्थंभूतलक्षणे

(B) कालाध्वनोरत्यन्तसंयोगे

(C) कर्मणि द्वितीया

(D) कर्मप्रवचनीययुक्ते द्वितीया

32. चीनीभाषा कीदृशे वर्गे आयाति ?

(A) योगात्मके (B) अयोगात्मके

(C) श्लिष्टयोगात्मके (D) अश्लिष्टयोगात्मके

33. चवर्गध्वनीनां उच्चारणस्थानं किमस्ति ?

(A) मूर्धा (B) तालुः

(C) कण्ठः (D) दन्ताः

34. अवेस्ताभाषा कस्य परिवारस्य भाषा अस्ति ?

(A) भारत–आर्यपरिवारस्य (B) भारोपीयपरिवारस्य

(C) अफ्रीकीपरिवारस्य (D) अमेरिकीपरिवारस्य

35. निम्नलिखितासु का भाषा भारोपीयपरिवारस्य भाषा नास्ति ?

(A) जर्मनी (B) फ्रैंच

(C) फारसी (D) अरबी

36. निम्नलिखितेषु वर्णेषु को वर्णः स्पर्शवर्गी नास्ति ?

(A) क् (B) छ्

(C) त् (D) श्

37. निम्नलिखितेषु वर्णेषु को वर्णो अघोषोऽस्ति ?

(A) अ (B) ज्

(C) च् (D) द्

38. दिलीपस्य वृत्तं कस्मिन् काव्ये अस्ति ?

(A) रघुवंशे (B) बुद्धचरिते

(C) किरातार्जुनीये (D) मेघदूते

39. 'दशकुमारचरितम्' कस्य कवेः रचना अस्ति ?

(A) दण्डिनः (B) भवभूतेः

(C) बाणभट्टस्य (D) शूद्रकस्य

40. शूद्रकस्य का रचना अस्ति ?

(A) उत्तररामचरितम् (B) मेघदूतम्

(C) मृच्छकटिकम् (D) वेणीसंहारम्

41. उदयनस्य चरितम् कस्मिन् ग्रन्थे अस्ति ?

(A) शिशुपालवधे (B) मुद्राराक्षसे

(C) स्वप्नवासवदत्ते (D) वेणीसंहारे

42. निम्नलिखितेषु कतमो ग्रन्थो नाटकग्रन्थो नास्ति ?

(A) हर्षचरितम्
(B) अभिज्ञानशाकुन्तलम्
(C) मुद्राराक्षसम्
(D) वेणीसंहारम्

43. 'वाक्यं रसात्मकं काव्यम्' कस्य ग्रन्थकारस्य उक्तिः अस्ति ?

(A) कालिदासस्य
(B) बाणभट्टस्य
(C) विश्वनाथस्य
(D) दण्डिनः

44. गुणानां काव्यस्वरूपविषये का भूमिका अस्ति ?

(A) गुणाः काव्यस्य आवश्यकानि तत्त्वानि सन्ति।
(B) गुणाः काव्यस्य स्वरूपनिर्धारकाः सन्ति।
(C) गुणाः काव्यस्य उत्कर्षहेतवः सन्ति।
(D) गुणाः काव्यम् अलङ्कुर्वन्ति।

45. निम्नलिखितवाक्ये रिक्तस्थानं पूरयत :

वाक्यं स्याद् योग्यता .................... आसक्तियुक्तः पदोच्चयः।

(A) सन्निधि
(B) सार्थकता
(C) गुणवत्ता
(D) आकांक्षा

46. विश्वनाथस्य इमाम् उक्तिम् उचितशब्देन पूरयत :

'.................... महावाक्यम्'

(A) दीर्घवाक्यम्

(B) वाक्यानां समूहः

(C) वाक्योच्चयः

(D) प्रकरणम्

47. लक्षणाशक्तेः किम् आवश्यकं तत्त्वम् ?

(A) मुख्यार्थबाधः

(B) मुख्यार्थस्य निगीर्णम्

(C) मुख्यार्थसंकोचः

(D) मुख्यार्थविस्तारः

48. 'अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये' परिभाषेयं कस्याः लक्षणायाः सन्दर्भे समीचीना अस्ति ?

(A) उपादानलक्षणा

(B) लक्षणलक्षणा

(C) सारोपा लक्षणा

(D) सादृश्या लक्षणा

49. कतमो भावः रसतां प्राप्नोति ?

(A) व्यभिचारिभावः

(B) स्थायिभावः

(C) मनोभावः

(D) अनुभावः

50. रसस्य सन्दर्भे निम्नलिखितेषु कः शब्दः समीचीनः ?

(A) ज्ञाप्यः

(B) नित्यः

(C) कार्यः

(D) आनन्दमयः